विषम् । तस्यागदं प्रवक्ष्यामि येन सम्पद्यते सुखम् । घृतं मधु शर्कराञ्च उशीरं चन्दनं तथा । एतदालोड्य दातव्यं पानं तस्य च सुव्रत ! । ततः प्रणश्यते दुःखं ततः सम्पद्यते सुखम् । अथ तस्मिन् कृते योगे विषं तस्य निवर्त्तते । मज्जस्थानं ततो गत्वा मर्म्मस्थानं प्रधावति । विषे च मर्म्मसंप्राप्ते शृणु रूपं यथा भवेत् । निश्चेष्टः पतते भूमौ कर्णाभ्यां बधिरो भवेत् । वारिणा सिच्यमानस्य रोमहर्षो न जायते । दण्डेन हन्यमानस्य दण्डराजी न जायते । शस्त्रेण छिद्यमानस्य रुधिरं न प्रवर्त्तते । केशेषु लुच्यमानेषु नैव क्लेशप्रवेदने । यस्य कर्णौ च पार्श्वौ च हनूपादौ च सन्धयः । शिथिलानि भवन्तीह स गतायुरिति स्मृतिः । एतानि यस्य रूपाणि विपरीतानि गौतम ! । रुग्णन्तु तं विजानीयात् कश्यपस्य वचो यथा । वैद्यास्तस्य न पश्यन्ति ये पश्यन्ति कुशिक्षिताः । विचक्षणास्तु पश्यन्ति मन्त्रौषधिसमन्विताः । तस्यागदं प्रवक्ष्यामि स्वयं रुद्रेण भाषितम् । मयूरपित्तं मार्ज्जारपित्तं नकुलपित्तकम् । मत्स्यमहिषपित्तञ्च धानालीमूलमेव च । कुङ्कुमं भार्गवं कुष्ठं काश्मरी च त्वचं तथा । उत्पलस्य च किञ्जल्कं पद्मस्य कुमुदस्य च । एतानि समभागानि गोमूत्रेण च पेषयेत् । एषोऽगदो यस्य हस्ते दष्टेन म्रियते न वै । कालाहिनापि दष्टोऽपि क्षिप्रं भवति निर्विषः । क्षिप्रमेव प्रदातव्यं मृतसञ्जीवनौषधम् । अञ्जनञ्चैव नस्यञ्च क्षिप्रं दद्यात् विचक्षणः” भविष्यपु० । कश्यप उवाच “अतःपरं प्रवक्ष्यामि नागानां रूपलक्षणम् । सर्पदष्टस्य च तथा समासाद्द्विजपुङ्गव ! । अथ सर्पेण दष्टस्य ऊर्द्ध्वा दृष्टिः प्रजायते । सर्प्या दष्टस्य च तथा अधोदृष्टिः प्रजायते । नपुंसकेन दष्टस्य वक्रदृष्टिः प्रजायते । क्षुधा दष्टस्य वा साक्षा दृष्टिर्द्विजवरोत्तम ! । कुमारेणापि दष्टस्य दक्षिणा एव जायते । गुर्विण्या वाथ दष्टस्य तथा स्वेदश्च जायते । रोमाञ्चः स्यात् सूतिकया वेपथुश्चापि जायते । पन्नगी प्रभवेद्रात्रौ दिवा सर्पो विषाधिकः । नपुंसकस्तु सन्ध्यायां कश्यपेन तु भाषितम् । अन्धकारे तु दष्टानामुदके गहने वने । सुप्तस्य वै प्रमत्तस्य पदे सर्पो न दृश्यते । दष्टरूपाण्यजानन् वै कथं वैद्यश्चिकित्सति । चतुर्विधास्तु संप्रोक्ताः पन्नगास्तु महात्मना । दर्व्वीकरा मण्डलिनो राजिला व्यन्तरास्तथा । दर्व्वीकरा वातविषा मण्डलाः पैत्तिकाः स्मृताः । श्लेष्मिका राजिला ज्ञेया व्यन्तराः सान्निपातिकाः । रक्तं परीक्षयेद्गाढं सर्पाणान्तु पृथक् पृथक् । कृष्णं दर्व्वीकराणान्तु जायते वातलक्षणम् । रक्तं घनञ्च बहुशः शोणितं मण्डलिक्षते । पिच्छिलं राजिले स्वल्पं तद्वद्व्यन्तरके तथा । ज्ञेयाः सर्पास्तु चत्वारः पञ्चमो नोपलभ्यते । ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैव चतुर्थकः । ब्राह्मणे मधुरं दद्यात् तिक्तं दद्यात्तथोत्तरे । वैश्ये कर्षफलं दद्यात् शूद्रे त्रिफलमेव वा । ब्राह्मणेन तु दष्टस्य दाहो गात्रेषु जायते । मूर्च्छा च प्रबला स्याद्वै न ज्ञानमभिजायते । श्यामवर्णं मुखञ्च स्यान्मन्यास्तम्भश्च जायते । तस्य कुर्य्यात् प्रतीकारं येन सम्पद्यते सुखम् । अश्वगन्धामपामार्गं सिन्धुवारं सुरालयम् । एतत् सर्पिःसमायुक्तं पानं नस्यञ्च दापयेत् । एतेनैवोपचारेण सुखी भवति मानवः । क्षत्रियेण तु दष्टस्य कम्पो गात्रेषु जायते । मूर्च्छा मोहस्तथा स्याद्वै न ज्ञानमभिजायते । जायते वेदना तस्य ऊर्द्ध्वञ्चैव निरीक्षते । तस्य कुर्य्यात् प्रतीकारं येन सम्पद्यते सुखम् । अर्कमूलमपामार्गं प्रियङ्गुमथ वारुणीम् । एतत् सर्पिःसमायुक्तं पानं तस्य प्रदापयेत् । एतेनैवोपचारेण सुखी भवति मानवः । वैश्येनापि हि दष्टस्य शृणु रूपाणि यानि तु । श्लेष्मप्रकोपो लाला च नवोद्वहति वेदना । मूर्च्छा च प्रबला यस्य आत्मानं नाभिनन्दति । तस्य कुर्य्यात् प्रतीकारं येन सम्पद्यते सुखम् । अश्वगन्धां स गोमूत्रां वटधूमं सगुग्गुलम् । शिरीषार्कपलाशञ्च श्वेतां च गिरिकर्णिकाम् । गोमूत्रेण समायुक्तं पानं नस्यञ्च दापयेत् । एष वैश्येन दष्टानामगदः परिकीर्त्तितः । शूद्रेणापि हि दष्टस्य शृणु तत्त्वेन गौतम ! । कुप्यते वेपते चैव ज्वरः शीतश्च जायते । अङ्गानि चुलुचुलायन्ते शूद्रदष्टस्य लक्षणम् । तस्यागदं प्रवक्ष्यामि येन सम्पद्यते सुखम् । पद्मञ्च लोध्रकञ्चैव क्षौद्रं पद्मस्य केशरम् । मधु मधूकसारञ्च श्वेता च गिरिकर्णिका । एतानि समभागानि पेषयेत् शीतवारिणा । पानं लेपाञ्जनं नस्यं सुखी भवति मानवः । पूर्व्वाह्णे चरते विप्रो मध्याह्ने क्षत्रियश्चरेत् । अपराह्णे चरेद्वैश्यः शूद्रः सन्ध्याचरो भवेत् । आहारश्चात्र पुष्पाणि ब्राह्मणानां विदुर्बुधाः । मूषिकाः क्षत्रियाणाञ्च आहारो द्विजसत्तम ! । वैश्या मण्डूकभक्ष्याश्च शूद्राः सर्व्वाशिनस्तथा । अग्रतो दशते विप्रः क्षत्रियो दक्षिणेन तु । वामपार्श्वे